श्री धनलक्ष्मी स्तोत्रं

श्रीधनदा उवाच-

देवी देवमुपागम्य नीलकंठं मम प्रियं ।

कृपया पार्वती प्राह शंकरं करुणाकरं ॥1॥

श्रीदेव्युवाच-

ब्रूहि वल्लभ साधूनां दरिद्राणां कुटुंबिनां ।

दरिद्र-दलनोपायमंजसैव धनप्रदं ॥2॥

श्रीशिव उवाच-

पूजयन् पार्वतीवाक्यमिदमाह महेश्वरः ।

उचितं जगदंबासि तव भूतानुकंपया ॥3॥

ससीतं सानुजं रामं सांजनेयं सहानुगं ।

प्रणम्य परमानंदं वक्ष्येऽहं स्तोत्रमुत्तमं ॥4॥

धनदं श्रद्दधानानां सद्यः सुलभकारकं ।

योगक्षेमकरं सत्यं सत्यमेव वचो मम ॥5॥

पठंतः पाठयंतोऽपि ब्राह्मणैरास्तिकोत्तमैः ।

धनलाभो भवेदाशु नाशमेति दरिद्रता ॥6॥

भूभवांशभवां भूत्यै भक्तिकल्पलतां शुभां ।

प्रार्थयेत्तां यथाकामं कामधेनुस्वरूपिणीं ॥7॥

धर्मदे धनदे देवि दानशीले दयाकरे ।

त्वं प्रसीद महेशानि! यदर्थं प्रार्थयाम्यहं ॥8॥

धरामरप्रिये पुण्ये धन्ये धनदपूजिते ।

सुधनं धार्मिकं देहि यजमानाय सत्वरं ॥9॥

रम्ये रुद्रप्रिये रूपे रामरूपे रतिप्रिये ।

शिखीसखमनोमूर्त्ते प्रसीद प्रणते मयि ॥10॥

आरक्त-चरणांभोजे सिद्धि-सर्वार्थदायिके ।

दिव्यांबरधरे दिव्ये दिव्यमाल्योपशोभिते ॥11॥

समस्तगुणसंपन्ने सर्वलक्षणलक्षिते ।

(अधिकपाठ। जातरूपमणींद्वादि-भूषिते भूमिभूषिते ।

शरच्चंद्रमुखे नीले नील-नीरज-लोचने ॥12॥

चंचरीकचमू-चारु-श्रीहार-कुटिलालके ।

मत्ते भगवति मातः कलकंठरवामृते ॥13॥
हासावलोकनैर्दिव्यैर्भक्तचिंतापहारिके ।
रूप-लावण्य-तारूण्य-कारुण्य-गुणभाजने ॥14॥
क्वणत्कंकणमंजीरे लसल्लीलाकरांबुजे ।
रुद्रप्रकाशिते तत्त्वे धर्माधारे धरालये ॥15॥
प्रयच्छ यजमानाय धनं धर्मैकसाधनं ।
मातस्त्वं मेऽविलंबेन दिशस्व जगदंबिके ॥16॥
कृपया करुणागारे प्रार्थितं कुरु मे शुभे ।
वसुधे वसुधारूपे वसु-वासव-वंदिते ॥17॥
धनदे यजमानाय वरदे वरदा भव ।
ब्रह्मण्यैर्ब्राह्मणैः पूज्ये पार्वतीशिवशंकरे ॥18॥
स्तोत्रं दरिद्रताव्याधिशमनं सुधनप्रदं ।
श्रीकरे शंकरे श्रीदे प्रसीद मयि किंकरे ॥19॥
पार्वतीशप्रसादेन सुरेश-किंकरेरितं ।
श्रद्धया ये पठिष्यंति पाठयिष्यंति भक्तितः ॥20॥
सहस्रमयुतं लक्षं धनलाभो भवेद् ध्रुवं ।
धनदाय नमस्तुभ्यं निधिपद्माधिपाय च ।
भवंतु त्वत्प्रसादान्मे धन-धान्यादिसंपदः ॥21॥

॥इति श्रीधनलक्ष्मीस्तोत्रं अथवा धनेश्वरी संपूर्णं ॥